द्वीनां वा एषामुभयपदवृद्धिर्भवतिपितिमितिच। आधिपत्यैविकं। आधिपत्यैतिकं। रूढ्लोकिकं। प्राक्रतिगणोयं। तिक्ताम्लांगुलेभ्यः। तिक्तामलीयं। अंगुलीयं। वर्गान्ताच्च। कवर्गीयं। ततआगतः। पंचम्यात्। सक्थ्नोदागतः स्त्रैघः। ठगायस्थानेभ्यः। राजगाह्यामास्थानं। भुक्तशालायाः आगतः शौक्तशालिकः। विद्यायोनिसंबंधेभ्योवुञ्। औपाध्यायकः। पैतामहकः। ऋतष्ठञ्। वुञोपवादः। हौत्रकं। मात्रकं। भ्रात्रकं। पितुर्यच्। चाढञ्। सिद्धः। यस्येतिलोपः। पैत्र्यं। पित्र्यं। गोत्रादंकवता। परंपरासंबंधः। विद्यभ्यआगतं वैद्यं। गार्गीयादक्षः। औपगवो हेतुर्मनुष्येभ्योऽन्यतरस्यां रूप्यः। समादागतं सम्यं। पक्षेगहादिलक्षः। समीयं। विषमीयं। दैवदत्तीयं। दैवदत्तरूप्यं। मयड्। सममयं। दैवदत्तमयं। प्रपवितो हिमवतः प्रभवति हिमवतो गंगा। विदूरात्प्रभवति वैदूर्यमणिः। दंत्यप्रायं शाद्वलवत्। नतुनडुलवन्मध्यमः। न न्वोर्यासंगतिः। वाल्वायादिअस्तिप्रभवतिदूरेतुसंस्कृतेभ्यः। अतएवसमाहितं माध्यवाल्वायो विस्पष्टं दरंचेति। वाल्वायशब्दः प्रत्ययलक्षणेविदूरादंशंवा स्वरूपठितनाद्यंशेनानुरूपस्थानी आक्षिप्यते। तद्गच्छतिपथिदूतयोः। स्त्रैघं गच्छतिस्त्रैघः पंथाः। दूरंवा। अभिनिष्क्रामतिद्वारं। स्त्रैघं

भिक्षागच्छ भिक्षो ढञ् कान्यकुब्जे न ढञ्। अधिकृत्यकृते ग्रन्थे। शारीरकमधिकृत्यकृतो ग्रं
थः। शारीरकीयः। शारीरकं भाष्यमिति तुअमदीपनाशनुपाराशर्यशिलालिभ्यां भिक्षु
नटसूत्रयोः। णिनिः स्यात्। पाराशर्येणप्रोक्तं भिक्षुसूत्रमधीयते पाराशरिणोभि
क्षवः। शैलालिनो नटाः। कर्मन्दकृशाश्वादिनिः। कर्मन्देनप्रोक्तं भिक्षुसूत्रमधी
यते कर्मन्दिनोभिक्षवः। कृशाश्विनो नटाः। उपज्ञाते। पाणिनिनाउपज्ञातंपाणिनी
यं। तस्येदमुपगादिदोषगवं। समिधामाधानेप्रेषणे। समिदाधान्योमन्त्रः। रथाद्यत्। र
थ्यचक्रं। पत्रपूर्वादञ्। पत्रं वाहनं। अश्वरथस्येदंआश्वरथं। हलसीरयुक्तं। हालिकं।
सैरिकं। गोत्रचरणाद्वुञ्। औपगवकः। चरणाद्धर्मिनायेयेतिवक्तव्यं। काठकं। चरणा
द्धर्मिनायेशारवाद्यायी। संघांकलक्षणेष्ठञ्ठक्ठञ्ष्यञ्। ब्राह्मणघोषग्रहणमपिक
र्तव्यं। ब्राह्मबैदः। संघोऽकोघोषोवा। वैदंलक्षणं। यत्। गार्गः। गार्ग्यौ। ढ्रञ्। दाक्षः।
दाक्षी। एवंपरासंबन्धोकः साक्षात्तुनलक्षणं॥ ॥इतिशैषिकाः॥ ॥तस्यविकारः। अ
श्मनोतिकोरिटेलोपः। अश्मनोविकारआश्मः। भाश्मनः। मार्तिकः। अयसश्च चप्रा २४६
ण्योषधेरकृषायः। चाहिकीरः। मयूरस्यविकारोवयवोवा मायूरः। मार्दंगिकोऽस्मवा।

पेक्षलं। त्रपुजतुनोःपुक्। आभ्यामण्। एतयोःपुक्॥ त्रापुषं। जातुषं। ओरञ्। दैवदारवं। अ
नुदात्तादेश्च ञ्। कापिष्ठलः। पलाशादिभ्योवा। अञ्। पालाशं। खादिरं। शाम्याः। शैरीषञ्।
शामीलं॥ मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। प्रकृतिमात्रमयड्व्याहिकारावयवयोः। जै
श्रमयं। आश्रमेनं। श्रमक्षयादिकः। मार्दंसूपः। कार्पासमाच्छादनं। नित्यंवृद्धशरादिभ्यः। आ
म्रमयं। शरमयं। एकाचोनित्यं। वाऽन्नेयं। गोमयपुरीषाद्गोमयं। एण्याञ्ञ्। ऐणेयं। ऐणस्यतुऐणं। गोप
यसोर्यत्। गव्यं। पयस्यं। फलेलुक्। विकारावयवप्रत्ययस्यालुक्। तद्धितलुकि। उपसर्जनस्त्रीप्रत्यय
स्य। आमलक्याः फलं आमलकं। लक्षादिभ्योण्। विधिसामर्थ्यान्नलुक्। लाक्षं। न्यग्रोधस्यच
केवलस्य॥ अस्यनद्यृद्वेर्जागमश्चानेयश्चेद्यं। जंघावा। अपूफले। जांबवं। पक्षेऽञ्। न
स्यलुक्। जंबुः। लुप्तेचेयाजंबाः फलप्रत्ययस्यलुपियुक्तवत्। जंबूः। फलंपाकश्रुषा
मुपसंख्यानं। नीव्रीहयः। मुञ्जाः पुष्पमस्येषुबडुलं। मल्लिकायाः पुष्पं मल्लिकाजातीविदार्याः
मूलंविदार्यादि। बडुलग्रहणान्नेक्षुपाटलानिपुष्पाणि। सान्वानिमूलानि। बाडुलका
श्चिचिल्लुकः। अशोकः। करवीरः। हरीतक्यादिभ्यश्च। फलप्रत्ययस्यलुप्। हरीतक्या
दीनांलिंगमिवप्रकृतिवत्। हरीतक्यापलानिहरीतक्याः॥ ॥इतिप्राग्दीव्यतीयाः॥

प्राग्वहतेष्ठक्। नहरतीत्यतःप्राक्कठगधिक्रियते॥ तत्र आहेति माशब्दादिभ्यउपसंख्यानं॥
माशब्दकारीतियंआहसमाशब्दिकः। आहप्रश्नादिभ्यः। प्रश्नंतमाहप्राश्निकः। प
र्याप्तिकः। एछतोसुस्नातादिभ्यः। सुस्नातंपृछतिसौस्नातिकः। सौरवशायनिकः। अनुश
तिकादीनामिकुभयपदवृद्धिः। अनुशतिकादिः। गछतोपथूदीरादिभ्यः। पाराद्गा
कः। गोप्रतल्पिकः। तेनदीव्यतिखनतिजयतिजितंवाआ
क्षिकः। संस्कृतंदध्नासंस्कृतंदाधिकं। माणविकंतरति। उडुपेनतरतिऔडुपिकः। गोपुछा
ट्ठन्। गोपुछिकः। नोघ्नष्ठन्। नाविकः। घटिकः। चरति। कस्मिनाचरतिकास्मिकः।
दध्नाचरतिदाधिकः। पर्णादिभ्यष्ठन्॥ पर्णेनचरतिपार्णिकः। येनपीठेनपंगवश्चरंतिसपर्यः।
प्रश्निकः। रथिकः। अध्वगणाट्ठञ्। चाट्ठन्। अध्वगणेनचरतिआध्वगणिकः। अध्वगिकः।
वेतनादिभ्योजीवतिवैतनिकः। सस्त्रादिभ्यष्ठन्। भस्त्रयाहरतिभास्त्रिकः। हरत्युपसंग
दिभ्यः। उत्संगेनहरतिऔत्संगिकः। विभाषाविवधात्ष्ठन्। वक्ष्यतिविवधेनहरति २४७
विवध्यधिकः। वैवधिकः। एकदेशविकृतेचाद्विवधाद्पिधीवेधाद्पिधीव

धिकः। वैवधिकः। विवधवीवधशब्दौउभयतोबहुशिन्ये स्वांशेवर्तेते। वीवधेनक्षुद्रतादिभ्यः। अक्षद्यूतेननिर्वृत्तं आक्षद्यूतिकं। वीरं। संस्कृते। दध्नासंस्कृ
तंदाधिकं। लवणाल्लुक्। लवणेनसंस्कृतोलवणः सूपः। मुद्गादण्। मौद्गओदनः। उंछ
तिष्ठक्। बदराण्णुछतिवादरिकः। रक्षतिसमाजंरक्षतिसामाजिकः। शब्दंदर्दुरं क
रोतिशब्दंकरोतिशाब्दिकः। दार्दुरिकः। पक्षिमत्स्यमृगान्हंति। स्वरूपस्यपर्यायाणांविशेषाणांचग्रहणं। मत्स्यपर्यायेषुमीनस्यैव। पक्षिणोहंतिपाक्षिकः। शाकुनिकः।
मार्गरिकः। मार्गिकः। मैनिकः। शाकुलिकः। मार्गिकः। हारिणिकः। सारंगिकः। धर्मं च
रति। धार्मिकः। अधर्मोद्येतिवक्तव्यं। आधर्मिकः। तदस्यपण्यं। अर्घापूर्वपण्यमस्य
आर्घपणिकः। लवणाट्ठञ्। लावणिकः। शिल्पं। मृदंगमादनंशिल्पमस्यमार्दंगिकः।
प्रहरणं। असिःप्रहरणमस्यआसिकः। इषुसूत्रं। धानुष्कः। शक्तियष्टेरीकक्। शा
क्तीकः। यष्टीकः। कस्मिनास्तिदिरमतिः। अस्तिपरलोकइत्येवंमतिर्यस्यसआ

सिकः। नास्तिमतिर्यस्य सनास्तिकः। दिष्टंमतिर्यस्य सदैष्टिकः। शीलं। अपूपल
क्षणंशीलंयस्यसौ आपूपिकः। छत्रादिभ्योणः। गुणदोषाणामावरणंछत्रंतच्छीछत्रंम
स्यतिष्ठात्रः। तत्रनियुक्तः। आकरेनियुक्तः। आकरिकः। निकटेवसति। नैकटिकोभिक्षुः।
॥ ॥इतिठगधिकारः॥ ॥प्राग्घितादाघतात्तस्मैहितमित्यतःप्राक्छयदधिक्रियतेतात
द्धतिरथयुगप्रासंगांरथंवहतिरथ्यः। युग्यः। प्रासंग्यः। धुरोयद्वहौ। धुर्यः। धौरेयः।
हलसीराद्वहः। हलंवहतिहालिकः। सैरिकः। विध्यत्यधनुषाद्वितीयांतात्तिध्यतीस
र्थेयत्यात्। नचेत्तत्रधनुःकरणं। पादोविध्यंपद्याः शर्कराः। नोवयोधर्मविषमल
सितातल्लाभ्यस्तार्यस्तल्यप्राप्यवध्या नाम्यसमसमितसंमितसंमितेष्वायत्।
नावातार्यनाव्यंजने। वयसातुल्योवयस्यः। धर्मेणप्राप्यंधर्म्यं। क्षिप्णवध्योविष्यः।
मृन्मूलेननाम्यंमूल्यं॥मूलेनसमूल्यौमौल्यौ। सीतयासमितंसीत्यंक्षेत्रं। तुल
यासमितंतुल्यं। तत्रसाधुः। सामसुसाधुः सामन्यः। अग्रहकर्मण्यः। अरण्यः
॥ सभायायः। सभ्यः॥ इतियतोविधिः॥ छ॥ ॥छ॥ ॥छ॥

प्राक्रीताछः। तेनक्रीतमित्यतः ष्ठाधिक्रियते। उगवादिभ्योयत्प्राक्रीतादित्येव।
उवर्णांतादृवादिभ्योयत्। छस्यापवादः। नाभिनभंचानभ्योक्षः। नाभ्यंहितं।
नभ्यमंजनं। रथनाभावेवरं। शुनःसंप्रसारणंचदीर्घश्च। श्वन्यं। शुन्यं। उधसो
नञ्चोधन्यः। कंबलाच्चेसंज्ञायां। यत्। कंबल्यंऊर्णापलशतं। सपादमुद्राद्वयंप
लं। संज्ञायांकिं। कंबलीयाऊर्णा। विभाषाहविरपूपादिभ्यः। श्रामिक्ष्येदधि। आमिक्षी
यं। पुरोडाश्याःपुरोडाशीयाः। अपूप्यं। अपूपीयं। तस्मैहितं। वत्सेभ्योहितो
वत्सीयोगोयुक्। शंकव्यंदारु। गव्यंहविषं। शरीरावयवाद्यत्। कंठ्यंनस्यंपद्
थन्नोमास्नेतिनसभावः। आजाविभ्योष्यञ्। अजर्ष्यायूधिः। अविष्या।
आत्मन्विश्वजनभोगोत्तरपदात्खः। आत्माध्यानौखे। प्रकृत्यैतयास्तः। आत्मने
हितंआत्मनीनं। अध्वनीनं। विश्वजनीनं। कर्मधारयादेवेष्यते। अन्यत्रविश्व
जनीयं। पञ्चजनाद्उपसंख्यानं। पंचजनीनं। मातृभोगीणः। आचार्यादणत्वं

च॥आचार्यभोगीनः॥ ॥ छयतोः एणीविधिः॥ ॥प्राग्वतेष्ठञ्॥तेनतुल्यमियतःप्रा
कृष्ठञधिक्रियते॥आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्॥तदर्हतीयेतदधिकाभ्यांठञधि
कारमध्येठञोपवादश्चगधिक्रियतेगोपुच्छादीन्वर्जयित्वा॥असमासेनिष्कादिभ्यः॥
आर्हादित्यतःतेनक्रीतमितियावत्तेते॥निष्कादिभ्योंसठगार्हीयेषुवर्थेषु॥निष्कणक्री
तादिकंनैष्किकं॥समुद्रानिष्कः॥शताच्चठन्यतावशते॥शत्यंशतिकं॥अशतेकिं
संख्यायाअतिशदंतायाःकन्॥अर्हीयेर्थे॥शतंपरिमाणमस्यशतकःसंघः
बऊकः॥त्यंतायास्तत्सासंघातिकः॥शदंतायाश्चत्वारिंशत्कःवतोमिडा॥ वत्वंतात्क
न्नडुतावत्कः॥तावतिकः॥कसादिठन्॥कंसिकः॥अर्हीच॥अर्हकः॥अ
ध्यर्धपूर्वाद्विगोर्लुगसंज्ञायां॥अध्यर्धपूर्वाद्विगोश्चपरःस्यार्हीयस्यलु
क्॥अर्धर्द्धकंसं॥द्विकंसं॥संज्ञायांपाचकलापिकं॥तेनक्रीतं॥ठञ्॥गोपुच्छनक्री १४९
तंगोपुच्छिकं॥साघ्रंतिकं॥प्रास्थिकंठक्॥नैष्किकं॥तस्येश्वरः॥सर्वभूमिपृ

थिवीभ्यामणञौसत्तः॥अनुशतिकादीनांच॥उभयपदवृद्धिः॥सर्वभूमेरीश्वरः॥
सार्वभौमः॥पार्थिवः॥तदस्यपरिमाणं॥प्रस्थपरिमाणमस्यप्रास्थिकःराशिः॥स्तोमे
डविधिः॥पंचदशमंत्राःपरिमाणमस्यपंचदशः॥सप्तदशः॥सोमयागेषुछंदोगैः॥
क्रियमाणएषादिसंज्ञिकास्तुतिःस्तोमः॥पंक्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्स
प्तिसप्तत्यशीतिनवतिशतं॥एतेसूढशब्दानिपाठ्यंते॥तदर्हति॥श्वेतच्छत्रमर्हति
श्वेतच्छत्रिकः॥दंडादिभ्यःएभ्योयत्॥दंडमर्हतिदंड्यः॥अर्घ्यः॥वध्यः॥तेननिर्वृत्तं॥
अकृतानिर्वृत्तमाह्निकं॥॥ ॥इतिठञ्ठक्कोरधिकारः॥तेनतुल्यंक्रियाचेद्वतिः॥
ब्राह्मणेनतुल्यंब्राह्मणवदधीतेकिंपाचेकिं॥गुणतुल्येमात्रच्॥पुत्रेणतुल्य
स्थूलः॥तत्रतस्येव॥मथुरायामिवमथुरवत्॥स्तुच्चेप्राकारः॥चैत्रस्येव
चैत्रवन्मैत्रस्यगावः॥तस्यभावेत्वतलौ॥प्रकृतिजन्यबोधेप्रकारोभावः॥
गोर्भावः॥गोत्वं॥गोता॥वातंकीवं॥अचित्वात्॥ब्रह्मणस्त्वइत्यतःप्राक्त्वतलावधि

क्रीयेते॥ अपवादैः सह समावेशार्थमिदं॥ चकारोनञ्नञ्प्यामपिसमावेशार्थः॥ स्त्र्यासावस्त्रीणां स्त्रीत्वं॥ स्त्रीतापोस्त्रं॥ पुंस्त्वंपुस्तापत्यादिभ्यइमनिज्वावचनमणादिसमावेशार्थं॥ स्तेनोहन्तादर्द्धेः॥ इष्टमयस्तादिः॥ लोपइष्टमयःसु॥ पुमङ्शकृशदृढपरिवृढानामिवत्वं॥ पृथ्वादिभ्यइमनिज्वा॥ पार्थिवं॥ मृदिमा॥ मार्दवं॥ वर्णदृढादिभ्यष्ट्यञ्चादिमनिचा॥ शौक्ल्यं॥ शुक्लमा॥ दाढ्यं॥ दार्ढिमा॥ गुणवचनब्राह्मणादिभ्यःकर्मणिचा॥ ब्राह्मण्यं॥ आकृतिगणोयं॥ चातुर्वर्ण्यादीनांस्वार्थउपसंख्यानं॥ चातुर्वर्ण्यं॥ चातुराश्रम्यं॥ सैन्यंचतुरङ्गं॥ त्रेस्वर्यंषाड्गुण्यंसैन्यं॥ सांनिध्यंऔपम्यंत्रैलोक्यप्रेक्षत्यादि॥ स्तेनाद्यन्नलोपश्च॥ नीतिसंघातग्रहणं॥ स्तेनस्यभावकर्मवास्तेयं॥ सख्युर्यः॥ सख्युर्यापकपिज्ञात्यार्ढकूकाकप्यं॥ ज्ञातियं॥ पत्यंतपुरोहितादिभ्योयक्॥ सैनापत्यं॥ पोरोहित्यं॥ राज्ञःसः॥ राजशब्दोऽमात्ययर्वलभनतइत्यर्थः॥ राज्ञोभावः॥ १५०

कर्मवाराज्यं॥ समासेतुब्राह्मणादिभ्यश्च॥ आधिराज्यं॥ प्राणिजातिवयोवचनोद्गात्रादिभ्यो॥ प्राणिजातिः॥ श्रौत्रं॥ वयोवचनंकौमारं॥ श्रोत्रंनेत्रं॥ सौष्ठवं॥ हायनांतयुवादिभ्योण्॥ द्व्यायनंत्रैहायनं॥ यौवनंस्थाविरं॥ श्रोत्रियस्ययलोपश्च॥ श्रोत्रंकुशलनिपुणचपलपिशुनकुहरक्षत्रज्ञाः॥ युवादिभ्योब्राह्मणादिभ्यश्चपक्षेतल्॥ कौशल्यं॥ कौशलमित्यादि॥ इगंताच्चलघुपूर्वात्॥ शुचेर्भावःकर्मवाशौचं॥ मौनं॥ यौपधाढ्ढुरूपोत्तमाद्यः॥ रामणीयकं॥ प्राभिधानीयकं॥ सहयाद्यः॥ साहाय्यं॥ साहायकं॥ द्वंद्वमनोज्ञादिभ्यश्च॥ शैष्योपाध्यायिकं॥ मानोज्ञकं॥ ॥ इतिनञ्स्नञोरर्थाधिक्याकारः॥ धान्यानांभवनेक्षेत्रखञ्॥ मुद्गानांभवनंक्षेत्रंमौद्गीनं॥ व्रीहिशाल्यर्ढकूव्रैहेयं॥ शालेयं॥ यवयवकषष्टिकाद्यत्॥ यव्यंयवकं॥ षष्टिकं॥ विभाषातिलमाषोमाभंगाणुभ्यः॥ यत्रापक्षेखञ्॥ तिल्यंतैलेयं॥ माष्यं॥ माषीयं॥ उम्यौमीनं॥ नंग्यंमांगीनं॥ अणव्यंआणवीनं॥ तत्सर्वाक्ष्वस्कदःपथ्यंगकभपत्रपात्रंव्याप्नोति॥ सर्वादिःपथ्याद्यंतादिनीयंतान्वः॥ सर्वंपथ्यान्व्याप्नोतिसर्वपथीनः॥ सर्वांगीणः॥ सर्वकर्मणिः॥ सर्वत्रीणः॥ हयंगवी

नंसंज्ञायां॥ नवनीतेनिपातोयं। तक्र्यपाकमूलेपील्वादिकर्मादिभ्यःकुणब्जाहनौ। पीलुपर्णे पाकःपीलुकुणः।कर्मण्यमूलंकर्मजाहः॥पक्षात्तिः।मूलेऽयनुवर्तते।पक्षस्यमूलंपक्षतिः।तिनविंशतेष्टक्चुप्चणपौ।यकारःप्रत्ययग्रहणः।दोलुक्षानिर्दिष्टः।तिनविंशस्यनेत्वं॥ विंशत्यादिभ्यष्टुंचुः।विंशावणः।विंशालचूंछकटवौ।क्रियाविशिष्टसाधनत्वाच्चकाल्लाथीं।विंशकटं।विंशालं।विंशकटं॥संप्रोदश्चकटच्।संकटंप्रकटं।उत्कटं।चाद्विकटं।अलाबूतिलोमभंगाभ्योरज्स्युपसंख्यानं।अलाबूनारडःअलाबुकटं।तिलकटं।गोष्ठज्ञादपस्थानादिषुनामभ्यः।गवांस्थानं।गोष्ठं।अश्वगोष्ठं।संघातेकटच्।अवीनांसंघातःअविकटः।विस्तारपटच्।अविपटः।द्विगोर्यूगच्।द्वाभ्यांवृष्टोउष्ट्रोयुगः।षट्कतिकतिपयचां।अश्वषट्वं।स्नेहेतैलच्।तिलतैलं।सर्षपतैलं॥ अवालुटारच्।चाकटच्।अवाचीनः।अधेकुटारः।अवकटः।नतेनाभिकायाःसंज्ञा यांटीटच्।नाटच्।फटच्।अवादिभ्यो।नतंनमनं।नाभिकायाःनतंअवटीटं॥ १५१

अवनाटं॥अवफटं।नतेगाभिकाअवटीटं॥पुरुषावटीटःउपाधिभ्यांयकन्।नासंज्ञा कूटोयोःपर्वतस्यआसन्नंस्थलंउपत्यका।आसन्नंकूटंस्थलमधित्यका।कर्मणिघटोठच्। कर्मणिघटेकर्मठः।तदस्यसंजातंतारकादिभ्यइतच्।तारकाःसंजाताअस्यतारकितंननः।पंडितः।आकृतिगणोयं॥प्रमाणद्वयसच्चदघ्नञ्मात्रचः॥ ऊरूप्रमाणमस्यऊरूद्वयसं।ऊरूदघ्नं॥ऊरूमात्रं॥प्रथमश्चद्वितीयश्चऊर्ध्वमानेमतोमम।ऊर्ध्वमानंकिलोन्मानंपरिमाणंतुसर्वतः॥१॥आर्यामस्तप्रमाणेस्यासंख्यावाद्यास्तसर्वतः॥॥पुरुषहस्तिभ्यामणच्।पुरुषःप्रमाणमस्यपौरुषं।पुरुषद्वयसं।यत्तदेतेभ्यःपरिमाणेवतुप्।यत्परिमाणमस्ययावत्।तावत्।एतावत्।किमिदंभ्यांवोघः।आभ्यांवतुप्वस्यवघः।इदंकिमोरियकी॥दृग्दृशवतुषु।कियान्।इयत्।किमःसंख्यापरिमाणेडतिच्चाडतुप्।तस्यवघः।कासंख्यायेषांतेषांकति।किंतःसंख्यायाअवयवेतयप्। पंचअवयवाअस्यपंचतयं॥द्वित्रिभ्यांतयस्योयड्वा।द्वयं॥द्वितयं॥त्रयं॥त्रितयं॥उभयाडुभयत्तोनित्यं॥उभयं।तदस्मिन्नधिकमितिदृष्टादाडुः॥एकादशअ

धिकाः अस्मिन्नेकादशे॥ शतसङ्ख्यपोरवयवे। नेह॥ एकादशाधिकाअस्यां
विंशत्यां। प्रकृतिप्रत्ययार्थयोः समानजातीयत्वे॥ एवेयते। नेह॥ एकादशभाषाअ
धिकाअस्मिन्सुवर्णशते। शदंतविंशतिश्चाडः स्याउक्तार्थे॥ त्रिंशदधिकाअ
स्मिन्त्रिंशशते। विंशं॥ तस्यपूरणेडटू। संख्यायाडयेव। एकादशानांपूरणएक
एकादशः॥ नांतादसंख्यादेर्मट्। डयोमडागमः। पंचानांपूरणः पंचमः॥ नांतात्किं। विंशः
असंख्यादेः किं। एकादशः॥ षट्कतिकतिपयचतुरांथुक्। डटि। षष्ठांपूरणः षष्ठः॥
कतिथः। कतिपयशब्देस्यात्एवडटू॥ कतिपयथः। चतुर्थः। चतुरश्छयतावाद्यस्यलो
पश्चातुरीयः। तुर्यः। बहुपूगगणसंघस्यतिथुक्। डटि। बहुतिथः। वतोरिथुक्। वत्व
तादिथुग्डटि। यावतिथः। द्वितीयः। डटोपवादः। द्वयोः पूरणोद्वितीयः। त्रेः संप्रसार
णंचात्तीयः। इहहडतिदीर्घत्वं। द्वितीयतृतीयेतिनिषेधेदशादेर्विंशत्यादेस्य
॥ उत्तमडन्यतरस्यां। उदितौ विंशतितमः। विंशएकश्चविंशतितमः। एकत्वेसंकविंशतिः।
नियंशतादिमासार्धमाससंवत्सरशतेभ्यः॥ शतस्यपूरणः शततमः। एकशततमः॥

मासादेस्तएवडट्। मासतमः। षष्ट्यादेश्चासंख्यादेः। षष्टितमः। संख्यादेस्तुविंशत्यादि
भ्यस्तीतिविकल्पएव। एकषष्टः। एकषष्टितमः। मंत्रेऽसक्तसाम्नोः। मत्वर्थेछः। प्रश्नो
वाकशब्दोस्मिन्प्रश्नवाकीयंसूक्तं। वारवंतीयंसाम। त्रीन्त्रियज्ञदोधीतेऽधी
त्रिः विंयनुवक्तेः। छादेः। पूर्वादिनिः। पूर्वंस्नातमनेनपूर्वी॥ सऽपूर्वोच्चेः। कृतपूर्वी॥
इष्टादिभ्यश्चेष्टमनेनइष्टी। प्रश्नेति॥ अनुपदमन्वेष्टा। अनुपदमन्वेष्टा। अनुप
दीगवां। साक्षाद्द्रष्टरिसंज्ञायां। साक्षाद्द्रष्टासाक्षी॥ तदस्यास्त्यस्मिन्निति मतुप्। गाथि
वेस्यसिनुवासंतिगो मानु॥ तसौमत्वर्थे॥ तांतसौतौसत्वसन्तःमत्वर्थप्रत्ययः॥ संप्रसा
रणं। विद्युमानु। गुणवचनेभ्यामतुपोलुगिष्टः। शुक्लागुणोस्यास्तीतिशुक्लः पटः
कल्कः। प्राणिस्थादातोलजन्यतरस्यां। चूडालः। चूडावानु॥ प्राणिस्थेति। शि
खावान्दीपः। प्राण्यंगादिवा। नेहमिधावान्। सिध्मादिभ्यश्चलिजर्थे। सिध्मलः।
सिध्मवानु॥ वातंयंतबलंलालयतीतिवातूलः। दंतलः। कफलः

ट्टनः।।वत्सासाभ्यांकामबले।।लज्जा।यथासंख्यंकामयतिबलवति चार्थे।
वत्सलः।।कृपासंज्ञःसलः।फेनादिलच्चा चालेचु।।अन्यतरस्यांमयडवर्णमतुप्
मुच्चयार्थेमनुवर्त्तते।।फेनिलः।फेनवान्।।लोमादिपामादिपिच्छादिभ्यःशनेलचः
लोमाद्यादिभ्यः शः।लोम×फेनल×शः।लोमवान्।रोमशः।रोमवान्।पामादिभ्यो
नः।पामनः।अंगात्कल्याणे।अंगना।अस्यास्त्यर्थेलच्चूपिच्छादिभ्यः
लचूपिच्छलापिच्छवान्।ऊर्मिलः।ऊर्म्यस्यान्।प्रज्ञाश्रद्धाचार्यायोपसंख्यानं।प्राज्ञीया
करणेप्राज्ञः।श्राद्धः।आर्चेः।इदंतेभ्यः।।वार्तेः।तपःसहस्राभ्यांविनीनी।।
विनीग्राहिकारोपत्राणार्थेः।तपस्वी।सहस्री।अण्चातापसः।सहस्रः।ड्वित्स्ना
दिभ्यउपसंख्यानं।ड्वित्स्नः।तामिस्रः।सिकताःशर्कराश्चासिकताद्यः।शा
र्कराःदेशेषुबिलेचेचादणौमतुपूच।।सिकतासंत्यस्मिन्देशेसिकतिलः।
।सिकतः।सिकतावान्।एवंशर्करादिदंतऊनतऊचूऊनतंदास्यदं

तुरः।ऊषसुषिमुष्कमधोरः।ऊषरः।सुषिरः।मुष्कोडः।मुष्करः।मधुरः।एक
रणस्वमुस्वकुंडेभ्यउपसंख्यानं।स्वरः।मुस्वरः।कुंजोहस्तीहनुःकुंजरः।
नगपांसुपांडुभ्यश्चानगरंपांसुरः।कच्छाड्वत्वंचकच्छुरः।घट्टुभ्यांमः।घ
मःकुमःकिशाद्योन्यतरस्यां।प्रकृतेनान्यतरस्यांग्रहणेनमतुपिसिद्धेपुन
र्ग्रहणंदंतिठनोःसमावेशार्थं।केशवः।केशी।केशिकः।केशवान्।अन्यो
भ्योपिदृश्यते।मणिवः।नागविशेषः।हिरण्यवोनिधिविशेषः।अर्णसो
लोपश्च।अर्णवः।गांडुजगात्संज्ञायां।रुस्वदीर्घौयोर्यणा तंत्रेणान
देशः।गांडीवं।गांडिवोअर्जुनोपिनाकः।कांडांडादीनीचो।कांडीरः।भ्रां
डीरः।रजःकृषासुतिपरीषदोवलच्चू।रजस्वलाकृषीवलः।बलइतिदी
र्घः।प्रासुतीवलः।शौंडिकः।परिद्यवीर्षपाठीतंमपर्षद्वलः।अन्यभ्यो
पिदृश्यतेपात्रवलः।पुत्रवलः।शत्रुवलः।दंतशिरसासंज्ञायां।

दंतावलोहस्ती।शिखावलःकेशी।अतइनिठनौ।दंडीदंडिकः।व्रीह्यादिभ्य
श्चेतिव्रीहिकः।नंदादिभ्यइलच्चेतिचादिनिठनौमतुपूर्वत्वंदिलः।तुंदी
॥तुंदिकः।तुंदिवान्।रूपादाहतप्रशंसयोर्यप्।आहतेरूपमस्यास्तीति
रूप्यः।कार्षापणः।प्रशस्तंरूपमस्यास्तीतिरूप्यागोः।अन्येभ्योपिदृश्यते।
किमःपवेलः।गुण्याःब्राह्मणाः।असमायामेधास्रजोविनिःयशस्वी
यशस्वान्।मायावीव्रीह्यादिपाठान्मायी।मापिकः।स्रग्वी।स्रं
शृंगदाभ्यामारकन्।शृंगारकः।वृंदारकः।फलबर्हाभ्यामिनच्।फलिनः।बर्हि
णः।हृदयाच्चालुरन्यतरस्यां।हृदयालुः।हृदयीहृदयिकः।हृदयवान्॥
शीलाद्यर्थेभ्यस्तदस्मिन्।शीलंनमस्मिन्नस्तीतिशीलालुः।उष्णालुः।अभ्रंपुरो २५४
डाशः।तेनसहेतिनटभ्रालुः।तपःपर्वमरुद्भ्यां।पर्वतः।मरुतःउर्णायुस्।ऊ
र्णायुः॥वाचोग्मिनिः।वाग्मी।आलजादेश्चोबहुभाषिणी।कुत्सितइतिव

कव्यी।कुत्सितंबहुभाषतेवाचान्नोवाचाटः।यस्तुसम्यग्बहुवदतिनत्रवाग्मीसे
वास्वामिन्नैश्वर्ये।ऐश्वर्यवाचकात्स्वशब्दान्मत्वर्थेग्मिनिच्॥स्वामी॥अंश
र्शआदिभ्यश्चाअंशोस्यस्यविद्यतेअर्शसः।आकृतिगणोयं॥वातातीसाराभ्यांकु
कच्चचादिनिः।वातकी।अतीसारकी।पिशाचाच्चेपिशाचकी।हस्त्याजातौहं
वर्णीस्त्री।वर्णेदृक्तवारिणि।वर्णीकंशंभ्यांवनुयुस्तुनयसः।कमितिसुखसुखयोः
शमितिसुखे।आभ्यांसप्तप्रत्ययास्युः।युसूयसोःसकाम्युक्त्वार्थैः।कंवः।कंमः।
कंयुः।कंतिः।कंतुः।कंतः।कंयः।एवंशंवडयधिः।नुंदिवलिवटिभ्यः।नुंदिमः।व
लिमः।वटिमः।अहंशुभमोर्युस्।अहंयुः।अहंकारवान्।शुभंयुः।शुभान्वि
तः॥ ॥इतिमत्वर्थीयाः॥ ॥प्राग्दिशोविभक्तिः।दिक्शब्देभ्यइयतःप्राग्वक्ष्य
माणंप्रत्ययाविभक्तिसंज्ञाःस्युः।अयस्वार्थिकाः।किंसर्वनामबहुभ्योद्व्यादि
भ्यः।किमःसर्वनाम्नोबहुशश्चेतिप्राग्दीव्यतीयेचक्रियतेपंचम्यास्तस्मिन्।
पंचम्यन्तेभ्यस्तकमादिभ्यस्तस्मिन्स्याद्वाकुर्वितिहोः।किमःकुःस्यात्तादौ

तदोश्चविभक्तौ। कुतः। कस्मात्। इदमश्च। प्राग्दिशीयो। इतः। अत्र। एतदः प्राग्दिशी
यो। अत्र। एकाल्। त्वात्। सर्वादेशः। अतः। अमुतः। यतः। ततः। बकुतः। च्यादिस्तद्धाभ्यां। पर्य
भिभ्यां च। तसिल्। पञ्चमीसप्तमीतसिल्। सर्वेतद्ययथेः। सप्तम्यास्त्रल्। कु
त्र। यत्र। बकुत्र। इदमोहः। त्रलोपवादेः। इह। किंसात्। दास्यात्। क्व। कुतः। किमः। क्व। कुत्र।
उत्तराभ्यामपि दृश्यते। एवं चमीसप्तमीतसिल्प्रत्ययान्तादपि त्रतसिलादयो दृश्यन्ते। दृशिग्र
हणाद्यदादियोगएव। सप्तवान्। ततोसप्तवान्। तत्रभवान्। तंभवन्तं। ततोभवन्तं। तत्रभवं
तं। एवंदीर्घायुः। देवानांप्रियः। आयुष्मान्। सर्वैकान्यकिंयत्तदः। कालेदा। सप्तम्यंत
ष्यएष्यः। कालेर्थेदास्यात्। सर्वस्य सोन्यतरस्यां। दादोप्राग्दिशीयसर्वस्यसोवा।
सर्वस्मिन्काले सदासर्वदा। अन्यदा। कदा। यदा। तदा। काले किं। सर्वत्र देशेदमो हि
ल। सप्तम्यंतान्। एतेतोरेथोः। इदमएतदोरेतोसोरफादौथकाद्दादोचप्राग्दिशीयेरे।
अस्मिन्काले एतर्हि। काले किं। इहदेशे। अधुना। इदमः निपातोयं। दानींच। इदमो दा
नीं प्रत्ययः। काले। इदानीं। तदोदाचः। तदा। तदानीं। अनद्यतनेहिलन्यतरस्यां। क
र्हि। कदा। यर्हि। यदा। तर्हि। तदा। एतदः। एतदस्त्रतसोस्त्रतसौ। रेफादौथकाद्दादोचप्रा

ग्दिशीये। एतस्मिन्काले एतर्हि। सद्यःपरुत्परार्यैषमः परेद्यवद्यपूर्वेद्युरन्येद्युरन्यतरेद्यु
रितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः। एतेनिपात्यंते। द्यश्चोपयादेर्नलोपश्च वक्तव्यः। उभ
यद्युः। प्रकारवचनेथाल्। प्रकारवृत्तिभ्यः किमादिभ्यस्थाल्। तेनप्रकारेणतथा।
यथा। इदमस्थमुः। थालोपवादः। एतदोपिवाच्यः। अनेनएतेनवाप्रकारेणइत्थंकिम
ज्योकेनप्रकारेणकथं॥ ॥इतिप्राग्दिशीयाः॥ ॥दिक्शब्देभ्यः पंचमीसप्त
मीप्रथमाभ्योदिग्देशकालेष्वास्तातिः। सप्तम्यंतेभ्योदिग्देशकालेभ्यः दिग्देशकाल
वृत्तिभ्यः स्वार्थेस्तातिः। पूर्वाधरावराणामसिपुरधवश्चैषां। एषांअस्तायर्थेसिप्र
त्ययोगेचैषांपुर अध अव इत्यादेशाः स्युः। अस्तातिचां। पूर्वादीनांपुरस्तादयः स्युः। पू
र्वस्यांपूर्वस्याः पूर्वावादिकुपुरः पुरस्तात्। अधः। अधस्तात्। अवः। विभाषाकर्
स्यांअवस्तात्। अवरस्तात्। एवंदेशकालेचादिशिदृश्यः किं। एद्यो वसति। अस्त
× अस्तातत्वत्॥ × म्याद्यंतेभ्यः किं। पूर्वेद्युरागंतः। दिगादिवृत्तिभ्यः किं। पूर्वस्मिन्नगरेव
सति। अस्तातिचेति ज्ञापकादसिरस्तातिं नबाधते। दक्षिणोत्तराभ्यामतसुच्।

अस्तातेरपवादः। दक्षिणोत्तराभ्यां परतः परस्तात्। अवरस्तात्। अंचेर्लुक्। अंचत्यंताद्दिक्शब्दादस्तातेर्लुक्। प्राक्। उदक्। उपरि
रि। उपरिष्टात्। निपातावेतौ। पश्चात्। तृया। ऽउत्तराधरदक्षिणादातिः। उत्तरात्। अध
रात्। दक्षिणात्। एनप्। बन्यतरस्यामदूरेपंचम्याः। उत्तराधरदक्षिणेनवास्यादवध्यवधिम
तोः। सामीप्येपंचम्यंतात्तु। उत्तरेण। अधरेण। दक्षिणेन। पक्षेयथास्वंप्रत्ययोः। इहकुत्रच
दिक्शब्दमात्रादेतपमाङ्। पूर्वेणग्रामं। दक्षिणाग्रामं। अस्तातेर्विषये। दक्षिणा वसति। अ
पंचम्याइत्येव। दक्षिणादागतः। आहिच दूरे। दक्षिणा ग्रादत्त। दक्षिणाहि। दक्षिणा। उत्त
राद्य। उत्तराहि। ऽउत्तरा। संख्यायाविधार्थेधा। क्रियाप्रकारेवर्त्तमानात्संख्याशब्दा
त्स्वार्थेधास्यात्। चतुर्धा। एकाद्धोध्यमुञन्यतरस्यां। एकध्यं। एकधा। द्व्यष्टनोर्धमु
ञ्। आभ्यांधाद्द्व्यस्यधमुञ्यौ। द्वैधं। द्विधा। त्रेर्धंत्रिधा। ध्याच्चद्विधात्रे
धा। याप्येपाशप्। कुत्सितोभिषक्कुभिषक्कुपाशः। तीयादीकक्स्वार्थेवा। यः। द्वितीयकः।
द्वितीयः। नविद्यायाः॥ ६ द्वितीयाविद्येवा एकादिकिनिच्चासहाये। चक्रन्तु

को। एकः। एका। कीः। एकः कः। भूतपूर्वेचरट्। आद्यो भूतपूर्वेः। आद्यतरः। षष्ठ्यास्त्य
चषष्ठ्यंतात्। तपूर्वेचरूपस्यास्त्रेचरट्च। किलस्यभूतपूर्वो गोः। कुत्सरूपः। कुत्सचरः। अ
तिशायनेतमविष्ठनौ। अतिशायिविशिष्टार्थेद्वेतेः स्वार्थेएतोस्तः। अयमेषामतिशयेनाद्यः
आद्यतमः। लघुतमोलघिष्ठः। तिङ्श्चातिहङ्तादतिशयेद्यो। द्येतमप्यात्। तरप्तमयो
घः। किमेत्तिङव्ययघादाम्त्रम्द्रव्यप्रकर्षे। किमएतदंतात्तिङोव्ययाद्यो घस्तदंतादामु
स्यानतुद्रव्यप्रकर्षे। किंतमां। पचतितमां। उच्चैस्तमां। द्रव्यप्रकर्षेतुऽउच्चैस्तमस्तरः॥ ६ द्वि
वचनविभज्योपपदेतरबीयसुनौ। द्वयोरेकस्यातिशयेविभक्तव्ये चोपपदमुतिङंता
देतोस्तःपूर्वयोरपवादः। अयमनयोरतिशयेनलघुःलघुतरोलघीयान्। उदीच्याश्च
प्राचेभ्यःपटुतरः। पटीयांसः। अजादिगुणवचनादेव। इष्टनीयसुनोनेहः। पापकृत
रः। पापकृतमः। प्रशस्यस्यश्रः। इष्ठयसोःपरतः। प्रस्थस्येकान्तु। इष्टादावेकाच्कयास्या
न्। श्रेष्ठः। श्रेयान्। ज्यन्। प्रशस्यस्य ज्यादेशइष्ठयसोः। ज्येष्ठः। अजादीयसोमः।
श्रादेःप्रस्य। ज्यायान्। वृद्धस्यच। ज्यादेशः। अजाद्योः। ज्येष्ठः। ज्यायान्। अंतिकबा
ढयोर्नेदसाधो। अजाद्योः। नेदिष्ठः। नेदीयान्। साधिष्ठः। साधीयान्। क्षुल्लदभ्रयुव

तरप्। क्षिप्रक्षुद्राणां यणादिपरंपूर्वस्य च गुणः। एषां पर्यणादि लुप्यते पूर्वस्य च गुणः। इ
ष्ठादिष्ठेषु स्थविष्ठः। यविष्ठः। क्षेपिष्ठः। क्षोदिष्ठः। एवमीयसुनू। क्षिप्रक्षु
द्राणां ष्ठ्याद्यि त्वाद्भसिमा। क्षेपिमा। क्षोदिमा। प्रियस्थिरे × स्थवीयान्। देवीयान्। इत्यादि। ×
स्फिरोरु बहुलयुक्तदवरप्रदीर्घवृंदारकाणां प्रस्थस्फवाबंहि गवेषित्र द्राघिवृंदाः। प्रि
यादीनां प्रादयस्थिरादिषु प्रेष्ठः। स्थेष्ठः। स्फेष्ठः। वरिष्ठः। बंहिष्ठः। गरिष्ठः। वर्षिष्ठः। त्रप्सि
ष्ठः। दाघिष्ठः। दृंहिष्ठः। एवमीयसुनू। प्रियागुबहुलदीर्घाणां ष्ठ्याद्यि त्वात्र मसादि।
बहोर्लोपो भूच्चबहोः। बहोः परयोरिमेयस्तोर्लोपस्याऽभूतोपश्च भूयाः। भूमा॥
भूयान्। इष्ठस्थियोर्विवा बहोः परस्येष्ठस्य लोपः। यिडागमश्च। भूयिष्ठः। विन्मतो
र्लुक्। इष्ठयसोः। अतिशयेनस्रग्वी स्रजिष्ठः। स्रजीयान्। अतिशयेनलघ्वान्। इ
तिलघिष्ठः। लघीयान्। प्रशस्तायां रूपप्। सुबंतात्तिङंताच्च प्रशस्तः पटुः पटुरूपः।
एवंतिङंतरूपैरिदमर्थेकल्पप्देश्यदेशीयरः। ईषदूनोविद्वान्। विद्वत्कल्पः। विद्व १५७
द्देश्यः। पचतिकल्पो। विभाषासुपोबहुचुरस्तात्तु। ईषदूनः पटुः। बहुपटुः।
पटुकल्पः। सुपः किं। यजतिकल्पं। प्राग्वाक्यः। इवेप्रतिकृतौ। वितः प्राक्

काधिकारः। अव्ययसर्वनाम्नामकच्प्राक्टेः। कापवादस्तिङ श्चेयनुवर्त्तते। कस्यचदः।
कांस्यव्ययस्यादेशोऽकच्च। अजातेः कः स्यात्कस्याश्चोऽचकः। उच्चैकैः। नीचकैः।
सर्वकैः। पचतकि। चकितं कुत्सिते। कुत्सितोऽश्वोश्वकः। अल्पो अल्पतेलंतेलकं क
स्वेकुस्वोवृद्धेश्वकः॥ अस्मिन्प्रकरणेहलादौप्रत्ययेहलो यादेश्चःपरस्य लोपोवाचः।
देवदत्तकः। दिवेदिवकः। लोपः पूर्वपदस्य च। दत्तकः। विनापित्रर्थंपूर्वोत्तरपदयोर्लोपोवा
वाच्यः। सत्यमामा। मामा। सत्यो। कुटीशमीशुंडाभ्योरः। कुस्वाकुटीकुटीरः॥ शमीरः। कुत्वा
डुपचूः। कुस्वाकुरः। कुतुंपः। कुत्सितेस्नेहपात्रे कुस्वासाकुतुपः पुमान्। कासश्वुंडारः। ×
सर्गेणिभ्यांष्टरच्। आयुचविशेषाः कासः। कुस्वासाकासतरी गौर्गीतरी। वत्सोक्षाश्वर्षभ
मयश्चतनूत्वे। वत्सतरः। उक्षतरः। ऋषभतरः। किंयत्तदोर्निर्धारणेद्वयोरेकस्यडतरच्। अ
नयोः कतरो वेष्टकवः। यतरः। ततरः। कौकबहूनांजातिपरिप्रश्नेडतमच्। जातिपरिप्रश्नड
तिप्रत्ययौख्यातमाकेः। कतमोभवतांकठः। यतमः। ततमः। वाग्रहणमकडर्थः। एकः
सकः। एकाच्च प्राचांडतरच्डतमच्स्यात्। अनयोरेकतरोमैत्रः। एषामेकतमः॥ ॥इ
तिप्राग्वीयाः॥ ॥इवेप्रतिकृतौ। कन्स्यात्। अश्वइवप्रतिकृतिः। अश्वकः।

शाखादिभ्योर्यः। शाखेवशाख्यः।मुख्यः।जघन्यः।अग्र्यः।शिरस्यः।कुशाग्रात्छः।
कुशाग्रीयः।तत्प्रकृतवचनेमयट्।प्राचुर्येणप्रस्तुतप्रकृतंतत्स्यवचनप्रतिपादनं।।मांसेअ
धिकरणेवाल्युट्।।आद्येप्रकृतेमांसंमांसमयं।अपूपमयंद्वितीयेत्वन्नमयंयाय
ज्ञः।अपूपमयंपर्वा।संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच्।अभ्यावृत्तिर्नामक्रियाज
न्यगणनकृतेःसंख्यायाःस्वार्थेकृत्वसुच्।पंचकृत्वोभुंक्ते।संख्यायाःकिं।भूरिवाराभुंक्ते।
द्वित्रिचतुर्थेःसुच्।कृत्वसुचोपवादः।द्विर्भुंक्ते।त्रिर्भुंक्ते।एतस्याचतुः।एकस्यसकृच्च।स
कृदादेशः।चासुच्वासकृद्भुंक्तेदेवतांतानाद्यर्थेयत्।तदर्थएवतादर्थ्यं।तादर्थेयत्रस्वा
र्थेष्यञ्।।अग्निदेवतायेहविरग्नेदेवत्यं।पित्रेदेवत्यं।पादार्घाभ्यांच।पादार्थमुद
कंपाद्यं।अर्घ्यं।अतिथेर्ण्येः।अतिथयेइदमातिथ्यं।नवस्यनूआदेशः।नप्तृनप्तृस्वा
श्वश्रूच्चाःस्वार्थे।नव्यं।नूतनं।नवीनं।नागरूपनामभ्योघेयः।नागधेयं।रूपधेयं।नाम १५८
धेयं।आग्नीध्रसाधारणाद्ण्।आग्नीध्रं।साधारणादेवात्तलौ।देवएवदेवता।अवेःकः।
अविरेवअविकः।यावादिभ्यःकन्।।यविष्ठयावकः।पण्यकः।सर्वप्रातिपदिकेभ्यः

स्वार्थेकन्।बहुतरके।मृदस्तिकन्।मृदस्तिका।सम्मोप्रशंसायां।रूपपोपवादः।प्रशस्तास्त्र
स्यः।स्त्रः।पुष्पादिभ्यश्च।अण्स्यात्।।प्रस्तवएवप्रास्तवः।देवतः।बांधवः।पूगाज्ज्यो याम
णीपूर्वात्।स्वार्थे।नानाजातीयाऽनियतैकार्थकामप्रधानाःसंघाःपूगाः।लोहितचंदनस्य
पत्रआपणेवक्तव्यतासंघातसंघोहितचंदनः।स्याद्यस्तद्राजाः।तद्राजस्येतिलुक्।लोहितचंदनाः।
व्रातेनिञ्यः।कापोतपाक्यः।कपोतपाकः।कौडायनाः।ब्राह्मायनाः।इत्यादि।बहुल्यार्थो
ग्रहणस्कारकादन्यतरस्यां।बहुनिंदायांबहुशः।।अल्पशः।बहुल्यार्थोनमंगलाभंगल
वचनेनेत्।बहुदासनिष्ठेषु।अल्पमाय्यादिकेषु।भाट्।।संख्येकवचनाच्चवीप्सायां।
द्वेद्वेदद्यात्तिद्विशः।माषंमाषंमाषशः।प्रस्थशः।परिमाणाच्चतावत्कार्थएकवा
संख्येकवचनात्किं।घटंघटंदद्यात्।वीप्सायांकिं।द्वौदद्यात्।द्वाकारकादिरेव।द्व
याद्योःस्वामी।प्रतियोगेपंचम्यास्तसिः।प्रतिनाकर्मप्रवचनीयेनयोगेयापेचमीवि
हितानदेनात्तसिः।प्रकृत्यादिभ्यस्तसोरुपसंख्यानं।।आ
दौ।आदितः।मध्यतः।एकतः।पार्श्वतः।आकृतिगणोयं।स्वेनास्वरतः।वर्णतः।
कृच्चस्त्रियांगेसंपद्यकर्तरिचिः।अभूततद्भावइतिवक्तव्यं।विकारात्मतांप्राप्नुव

यांप्रकृतौवर्त्तमानात्। विकारशब्दात्स्वार्थेचवोस्याकरोत्यादिभिर्योगे। अस्यच्वेः। ईत्। १५९
अकृष्णः कृष्णः संपद्यते तंकरोतिकृष्णीकरोति। ब्रह्मीभवति। गंगीस्यात्। अव्ययस्य
च्वावीत्वंतेनिवाच्यं। दोषाभूतमहः। दिवाभूतारात्रिः। क्यचूच्व्योश्चाहलः परस्यआ
पत्यप्रत्ययस्यलोपः क्यङ्च्व्योश्च। गार्गीभवति। च्वौच। दीर्घः शुक्लीभवतिपटः स्यात्।
अरुर्मनश्चक्षुश्चेतोरहोरजसांलोपश्च। चाक्षुषः। अरुःकरोति। उन्मनीकरोति। उच्चक्षुःक
रोति। अचेतीकरोति। विरहिणीकरोति। विरजीकरोति। विभाषासातिकार्त्स्न्ये। सातिविषयसा
तिर्वास्यात्साकल्ये। सात्यदाद्योः। कृत्स्नंशस्त्रमग्निःसंपद्यते। अग्निसाद्भवतिशस्त्रं।
अग्नीभवति। कात्स्न्येकिं। एकदेशेनभुक्तीभवतिपटः। अतिविधौसंपदाच। संपदाचकृ
त्यैर्योगेसातिर्वाव्याप्तौ। पक्षेकृत्वस्तियोगेच्विः। संपदानुवाक्यमेव। अग्निसात्संपद्यते। अग्नि
साद्भवतिशस्त्रं। अग्नीभवति। जलसात्संपद्यतेजलंभवतिलवणं। तदधीनवचने। सातिः
कृत्वस्तिभिः संपदाचयोगे। राजसात्करोति। राजाधीनमित्यर्थः। देयेत्राच। तदधीनेदेयत्रा
स्यात्सातिश्चकृत्यैर्योगे। विप्राधीनंदेयंकरोति। विप्रत्राकरोति। विप्रत्रासंपद्यते। पक्षे

विप्रसात्करोति। देयेकिं। राजसाद्भवतिराष्ट्रं। देवमनुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्यो
बहुलं। एभ्योद्वितीयांतेभ्यः सप्तम्यंतेभ्यश्चत्राःस्यात्। देवत्रावदेरमेव। बहुलोक्तेरन्यत्रा
पि। बहुत्राजीवतोमनः। अव्यक्तानुकरणाद्यजवरार्धादितोडाद्यूङ्। द्यूङ्अवरंन्यूनं ननु
ततोन्यूनं। अनेकाजितियावत्। तादृशमर्हंयस्यतत्तस्मात्डाद्यूङ्भ्यांयोगे। डाचि बहु
लंहृस्वभवतइतिडाचिविधिक्षितेद्विधे। नित्यमाम्रेडितेडाचीतिवक्तव्ये। डाच्यरंयदाम्रेडितंतस्मि
न्यरपूर्वेपरयोर्वर्णयोःपरुरूपंस्यात्। इतितपयोःपः। पटस्करोत्पटपटाकरोति। अव्यक्ता
नुकरणात्किं। द्यूङ्जवरार्हात्किं। श्वेतीकरोति। अवरेतिकिं। खरेखरंखरंटाकरोति। अनितोकिं।
पटितिकरोति। कृत्रोद्वितीयतृतीयशंबबीजात्कृषः। द्वितीयादिभ्योडाद्यूङ्भ्यएवयो
गे। बहुलोक्तेरव्यक्तानुकरणाभ्यस्यडाचिनभ्वां। द्वितीयांतृतीयंकर्षणंकरोतिद्वितीयां
याकरोतितृतीयाकरोति। शंबाकरोति। बीजाकरोति। संख्यायाश्चगुणांतायाः। द्विगु
णाकरोतिक्षेत्रं। समयाच्चयापनायां। कषादिनिवृत्तौ। समयाकरोति। कालंपाप
यतीत्यर्थः। सपत्रनिष्पत्रादतिव्यथने। सपत्राकरोति। मृगंसपुरुषंशरःप्रवेशनेनस

पत्रं करोतीत्यर्थः। निष्पत्राकरोति। सपुंखस्य शरस्यापरपार्श्वेनिर्गमना निष्पत्रंकरोतीत्यर्थः॥
अतिव्यथनेकिं। सपत्रंनिष्पत्रंकरोतिभूतले। निष्फलानिष्कोषणे। निष्फलाकरोतियाडिमं। नि
र्गतंकुलमंतरं वयवानांसमूहोयस्यादितिबहुव्रीहिः। डाचू। मुखप्रियपर्यनुलोम्यासुखाकरोति।
प्रियाकरोतिगुरुं। अनुकूलाचरणेनानंदयतीत्यर्थः। दुःखात्प्रतिलोम्या। दुःखाकरोतिस्वामि
नंपीडयतीत्यर्थः। शूलात्साकं। शूलाकरोति। शूलेनपचतीत्यर्थः। सत्यादशपथे। सत्याकरोति
भांडंवणिक्। क्रीतव्यतिहारेतत्यंकरोतीत्यर्थः। शपथेतुसत्यंकरोतिविप्रः। मद्रात्परिवापणे। मद्रश
ब्दोमंगलार्थः। परिवापणंमुंडनं। मद्राकरोतिकुमारं। मांगल्यंमुंडनेन संस्करोतीत्यर्थः। म
द्रशब्देतिवक्तव्यं। मद्राकरोति। अर्थेः प्राग्वत्। परिवापणेकिं। मद्रंकरोति॥ ॥इतितद्धितप्रक्रिया।
॥ ॥सर्वस्यद्वेदूर्यधिकृत्यापरेवर्जने। पतिपरिवंगेभ्योहृषदेवः। वंगात्परियंत्रेत्यर्थः।
उपर्यध्यधसः सामीप्ये। उपरुपरिग्रामं। ग्रामस्योपरिष्टात्समीपदेशेऽइत्यर्थः। अध्य
धिसुखं। सुखस्योपरिष्टात्समीपकालेऽइत्यर्थः। अधोधोलोकं। लोकस्याधस्ता २७
त्समीपदेशेऽइत्यर्थः॥ वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु। सुंदरसुंदर

इत्थंभूतेनेत्थं। देवदेववं द्यो। त्रिऽविनीतऽइविनीतरयानीतास्यत्रि। धानुष्कधानुष्कइत्था
तेधनुः। चोरचोरघातयिष्यामित्यो। एकंबहुव्रीहिवत्। द्विरुक्तएकशब्दोबहुव्रीहिवत्। तेनसु
ब्लोपपुंवद्भावो। एकैकमक्षरं। एकैकयाऽऽहुत्या। आबाचेच। पीडयांहेस्तबहुव्रीहिवच्च। ग
तगतः। गतगता। प्रकारेगुणवचनस्यासादृश्येद्योत्यगुणवचनस्यद्वेरुक्तः तच्चकर्मधारयव
त्॥ पटुपटुः। पटुसदृशः। ईषत्पटुरिति यावत्। प्रातिपूर्व्येदेवाच्ये। मूलेमूलेस्थूलः।
संज्ञेमिणप्रकृत्योर्यथेष्टमनेकधाप्रयोगो न्यायसिद्धः। सर्वः। बुध्यस्वरादर्थेतिहारेसर्वना
म्नोद्वावाच्ये। समासवच्चबहुलं। बहुलग्रहणान्नपरयोर्नसमासवत्। इतरशब्दस्यतुनि
त्यं। असमासवद्भावेपूर्वपदस्थस्यसुपःसुर्वक्तव्यः। अन्योन्यंविप्रानमंति। अन्योन्यो। अ
न्योन्येनकृतं। अन्योन्यस्मैदत्तमित्यादि। स्त्रीनपुंसकयोरुत्तरपदस्थायाविभक्तेरामूस्या
वोवाच्यः। अन्योन्यांअन्योन्यापरस्परांपरस्परं। इतरेतरांइतरेतरंगाइमेब्राह्मण्यो। कुलेवा
भोजयतः। दलशेयटावप्रावः। क्रीबेवाद्विरुक्तः स्वमोः। समासेस्नुक्चेतिसिद्धंबाहुल
काच्चयं। अन्योन्यमित्यादौदलशेयटापि। इतरेयदुच्चप्राप्तः। अन्योन्यसंसक्तमिहस्त्रि
यामं। अन्योन्यश्रयः परस्परापेक्षसादृश्यं। अदृष्टपरस्परापेक्षादौ सोर्लुक्चप्राप्तः। सर्व

बाङ्गलः कासमाधेयं॥ ॥इतिद्विरुक्तप्रक्रिया॥ ॥स्त्रियां॥अधिकारोयंसमर्थो नामि
यावत्॥अजाद्यतष्टाप्॥अजादीनामकारांतस्यचवाच्ये यत्स्त्रीत्वंतत्रयोयेटाप्स्यात्॥अ
जा॥अजादिभिस्त्रीत्वविशेषणान्नेह॥पंचानांअजानांसमाहारःपंचाजी॥अत्रहिसमास्तथेस
माहारनिष्ठंस्त्रीत्वं॥अतः॥खट्वा॥अजा॥एडका॥॥अश्वा॥चटका॥मूषिका॥बाला॥वत्सा॥
होडा॥मंदा॥विलाता॥संपन्नोजिनशापापिंडेभ्यःफलात्॥संपलाड्यादि॥सटचूकाडप्रांतश
तीकेभ्यःपुष्पात्॥स्थूलपुष्पा॥प्राक्पुष्पा॥प्रत्यक्पुष्पा॥शूद्रावामहत्पूर्वाजातिः॥पुंयोगेऽपूर्वी॥क्रु तु
त्वा॥उष्णिक्॥अमहत्सर्वकिं॥महाश्रद्धा॥कुंचा॥उष्णिहा॥देवविशा॥ज्येष्ठा॥कनिष्ठा॥म
ध्यमेतिपुंयोगेपि॥कोकिला॥जातावपि॥मूलानन्नः॥अमूलाऋनेभ्योऽपि॥कक्री॥
दंडिनि॥उगित॥श्वाडीपूमवंती॥पचंती॥वनोरच॥वनंतात्तदंताच्चडीपूयाद्वाश्रांतादृशः॥
मुखानमतिक्रांता॥अतिसुंदरी॥अतिधीवरी॥शर्वरी॥वनोनहृशः॥अवावा ब्रह्मणी॥राज
युधा॥बहुव्रीहौवा॥बहुधीवा॥बहुधीवरी॥पादोन्यतरस्यां॥द्विपदी॥द्विपात्॥[illegible]टाट
च्॥द्विपदात्रकूकएकपदा॥मनः॥मनंता॥नडीपू॥सीमा॥सीमानौ॥अनोबहुव्रीहेः॥अ २६१
भंता[illegible]हुव्रीहेर्नडीपू॥बहुयज्वा॥बहुयज्वानौडावुभाभ्यामन्यतरस्यां॥

सूत्रद्वयोपात्ताभ्यांजा[illegible]॥सीमा॥सीमे॥सीमानौ॥दामानौ॥दामे॥बहुयज्वा॥बहुयज्वी॥अ
नउपधालोपोन्यतरस्यां॥अन्नंताद्बहुव्रीहेरुपधालोपिनोवाडीपौ॥पक्षेडाप्॥निषेधौ॥बहु
राज्ञी॥बहुराज्यौ॥बहुराजे॥बहुराजानौ॥प्रत्ययस्थात्कात्पूर्वस्यात इदाप्यसुपः॥आसु
पःपरोनचेत्॥सार्विका॥कारिका॥अतःकिं॥नौका॥प्रत्ययस्थात्किं॥शक्नोतीतिशका॥अ
सुपःकिं॥बहुपटिकाजकानगरी॥मामकनरूकयारूपसंख्यानेमामिका॥नामिका॥त्यक्तय
ज्ञेश्वादाक्षिणात्यिका॥इहत्यिका॥नयासयोः॥यत्तदोरस्यतिनूयकाः॥सकाः॥एकनञ्भ्या
निषेधः॥उपत्यकाः॥अधित्यकाः॥आशिषिबुनञ्भ्यां॥नाजीवकाः॥भवकाः॥उत्तरपदलोपानदि
वदत्तिकादिवकाः॥क्षिपकादीनांचाक्षिपकाः॥ध्रुवकाः॥चटकाः॥चटकाः॥कन्यकाः॥तारकाः
ज्योतिषि॥अन्यत्रतरिकाः॥वर्णकांतांतावेः॥अन्यत्रवर्णिकाः॥वर्त्तिकाः॥शकुनौप्रावेः॥
उदीचांतुवर्त्तिकाः॥अष्टकापितरदेवत्ययासूतिकापुत्रिकाहंदारकाणांचेतिवक्तव्यं॥एषांवा
अकारोभवतीत्यर्थः॥सूतिकासूतकेयादिषु॥दीचामातःस्थानेयकपूर्वायाःयकः
पूर्वस्यस्त्रीप्रत्ययस्यातस्थानेयोतु॥तस्यकासु॥वैस्येहापिप्रयकणइतिकुत्वः॥आर्य
काः॥आर्यिकाः॥चटकाः॥आतःकिं॥सांकाश्येभवासांकाश्यिकाः॥पकेतिकिं॥अश्वि
चटकिकाः॥

का। स्त्रीप्रत्ययः किं। शुभंयिका। अकारान्तपुंस्काच्च। एतस्माद्धितस्यास्थाने योत्तस्यङ्वा।
गंगिका। गंगका। आदाचार्याणां। पूर्वविधेयं। गंगाका। अनुपसर्जनात्। अधिकारोयं यून
स्तिस्यधिक्याप्। टिड्ढाणञ्द्वयसज्दघ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः। अनुप
सर्जनं यद्धितदंतंयदंतंतत्तः ङीप्। कुरुचरी। उपसर्जनत्वान्नेह। बडुकुरुचरा। नद्य
ऽनदी। देवदेवी। सौपर्णेयी। एडी। औसी। ऊरुद्वयसी। ऊरुदघ्नी। ऊरुमात्री। चैपंत
यी। आक्षिकी। लावणिकी। यादृशी। एतरी। नञ्स्नञीकक्ख्युस्तरुणातलुनानुपसंख्या
नात्स्त्रेणी। पौंस्नी। शाक्तीकी। आखंकरणी। तरुणी। यञश्च। यञंतात्ङीप्। अका
रलोपश्च। हलस्तद्धितस्य। हलुत्तरस्योपधाभूततद्धितयकारस्यलोपइति। गार्गी।
प्राचांष्फतद्धितः। यञंतात्फोवा। गार्ग्यायणी। वयसिप्रथमे। प्रथमवयोवाचिनोदंतात्ङी
प्। कुमारी। क्न्यायांनेष्टः। वयस्यचरमइतिवक्तव्यं। वधूटी। चिरंटी। द्विगोः। अदंतात्
ङीप्। त्रिलोकी। पंचमूली। अजादित्वात्त्रिफला। त्र्यनीका। अपरिमाणबिस्ताचितकंबल्ये
भ्योनतद्धितलुकि। अपरिमाणांतात्द्विस्ताघ्नाच्च द्विगोर्नङीप्नतद्धितलुकि। पंचभि

रश्वैःक्रीतंपंचाश्वा। अर्हीयष्ठक्। अध्यर्धेतिलुक्। द्वौबिस्तौपचतिद्विबिस्ता। घ्याचिता। द्वि
कंबल्या। परिमाणांतात्तुघ्यठकौ। तद्धितलुकिकिं। समाहारेपंचाश्वी। कांडांतात्क्षेत्रे। क्षेत्रे
यःकांडांतोद्विगुस्तेनङीप्नतद्धितलुकि। द्विकांडःप्रमाणमस्याःद्विकांडाक्षेत्रमद्विकिः। मांत्र
वचःप्रमाणेभ्योद्विगोर्नित्यमितिलुक्। क्षेत्रेकिं। द्विकांडीरज्जुः। पुरुषात्प्रमाणान्यतरस्यां। प्र
माणेयःपुरुषस्तदंतात्द्विगोर्ङीप्नतद्धितलुकि। द्वौपुरुषौप्रमाणमस्याःद्विपुरुषीद्विपुरु
षावापशस्वा। हुयसोनञ्। उपोत्तमस्यबहुव्रीहेरनङ्स्त्रियां। बहुव्रीहेरुपसोङीप्।
उपोत्तमाद्बहुव्रीहेर्ङीप्स्यात्। कुंडोघ्नी। स्त्रियांकिं। कुंडोघ्नोधेनुकं। दामहायनांतात्च्छ।
संख्यादेर्बहुव्रीहेर्दामांतहायनांतात्छ्ङीप्। द्विदाम्नी। द्विहायनी। वला। त्रिचतुर्भ्यो
हायनस्यणलंवाच्यं। वयोवाचकस्यैहायनस्यहापणौवेष्येते। त्रिहायणी। चतुर्हाय
णी। वयसोन्यत्र। त्रिहायनान्यच्चतुर्हायनाशाला। अंतर्वत्पतिवतोर्नुक्। नांतत्वात्
ङीप्। अंतर्वत्नी। पतिवत्नी। गर्भेभर्तृसंयोगएवेष्यते। अन्यत्रतु। अंतरस्थेस्यां
चटःपतिमतीष्टथिवी। पत्युर्नोयज्ञसंयोगे। वसिष्ठस्यपत्नी। विभाषासपूर्व

पतिशब्दांतस्य नोवा। गृहपत्नी। गृहपतिः। दृढपत्नी। दृढपतिः॥ नित्यंसपत्न्यादिषु। सप
१६३ त्नी। एकपत्नी। वीरपत्नी। पूतक्रतोरचा। पूतक्रतो स्त्री पूतक्रतायी। ~~अग्नमाधी कुसिता~~
~~यी। सिध्वी~~। मनोरौच। ~~उ~~दात्तेकारश्च वाताभ्यां सन्नियोगशिष्टाड्डीपूच। मनायी। मना
वीमनुः। वृषाकपय्यग्नीकुसितकुसिदानामुदात्तः॥ वृषामुदात्तरे आदेशोडीपूच। वृषाकपेस्त्री
वृषाकपायी। अग्न्यायी। कुसितायी। कुसिदायी। वर्णादनुदात्तात्तोपधात्तोनः। वर्णवाची
यस्तोपधस्तदंतात्डीपूा। तस्यनः। एता। एनी। रोहितारोहिणी। षिद्भौदिभ्यश्चाडीपूा। न
त्तकी। गोरी। अनड्वाही। अनड्वाही। पिप्यल्यादिभ्यश्च। आकृतिगणोयं। मत्स्यस्यङ्यो॥
यलोपः। मत्सी। जानपदकुंडगोणस्थलभाजनागकालनीलकुशकामुककबराद्
त्यवमत्रावपनाद्वृत्रिमाश्राणास्थोन्यवर्णानाछादनायो विकारमैथुनेच्छाकेशवे १६३
शेषु। एकादशभ्यः क्रमाद्दृयादिष्वर्थेषुङीपू। जानपदी। वृत्तिश्चेत्। अन्याजानपदी।
अजांतत्वात्डीपिआद्युदात्तः। भाङ्गी। श्राणाचेत्। भाङ्गाऽन्या। यवा। गूरुच्छिकाश्रा
णा विलेपीतरलाचसा॥ शोणासाचां। शोणी। शोणा। वोतो गुणवचनात्। उदंताद्गुणवाचि

नो वाङीपू। मद्री। मद्रः। उग्रः। किं। शितिः। गुणेतिकिं। आरुणः। रक्तसंयोगोपधान्नः। रक्तः।
पांडुः। बाह्वादिभ्यश्चावाङीपू। बाह्वी। बाह्वः। ह्रस्वादिकाराद्क्तिनः। रात्रिः। रात्री। सर्वतोऽक्ति
न्नर्थादित्येके। शकटिः। शकटी। पुंयोगादाख्यायां। यापुमाख्यापुंयोगात्स्त्रियांवर्त्तते न
तोडीपू। गोपस्यस्त्री गोपी। पालकांतान्न। गोपालिका। अश्वपालिका। सूर्यदेवतायांचा
पू। सूर्यस्यस्त्रीदेवतासूर्यो। इंद्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्यो
णामानुक्। ङीषूच। इंद्राणी। हिमारण्ययोर्महत्वे। महद्धिमहिमानी। यवाद्दोषाद्दुष्टाय
वोयवानी। यवनाल्लिप्यां। यवनानांलिपिर्यवनानी। मातुलोपाध्यायोरानुग्वा। मा
तुलानी। मातुली। उपाध्यायानी। उपाध्यायी। आचार्यादणाचार्यानी। अर्य
क्षत्रियाभ्यांवास्त्रियां। आर्याणी। आर्या। क्षत्रियाणी। क्षत्रिया। उपोगतु। पेअर्यी। क्ष
त्रियी। क्रीतात्करणपूर्वात्। क्रीतांतादंतात्करणादेङीषू। वस्त्रक्रीती। क्वचिन्नो। घ
नुक्री। ता। बहुव्रीहेश्चांतोदात्तात्। क्रीतांतङीषूऊ। मिन्नी। अस्वांगपूर्वपदाद्दा। पू
र्वपनित्येप्राप्तेविकल्पार्थं। सुरापीता। सुरापीता। स्वांगाच्चोपसर्जनादसंयोगोपधात्।

असंयोगोपधमुपसर्जनं यत्स्वांगंतदंतात्प्रातिपदिकाद्ङीष्। अतिकेशी। अति
केशा। चंद्रमुखी चंद्रमुखा। संयोगोपधात्तु सुगुल्फा। अदंकमूर्तिमत्स्वांगं प्राणिस्थमवि
कारजं। अतस्थंतत्रदृष्टवतोऽन्यत्रतथायुतं। सुस्तनी। दत्वासुस्तना। अमूर्तत्वात्सुमुख्य
शाला। अप्राणिस्थत्वात्सुशोफा। विकारजत्वात्सुकेशी। सुकेशाश्च्यां। रथ्या। अप्रा
णिस्थस्यापिप्राणिनिदृष्टत्वात्सुस्तनी। सुस्तना। प्रतिमा। प्राणिवत्प्रतीयमानप्राणिस्थ
दृष्टोपचितत्वात्। नासिकोदरौष्ठजंघादंतकर्णश्रृंगाच्चाङीष्। तुंगनासिकी। तुं
गनासिका। पुच्छाच्च। सुपुच्छी। सुपुच्छा। कबरमपिविषयेऽन्यत्रियां। कबरपुच्छी।
उपमानात्सक्थ्नश्चपुच्छाच्च। नित्यमेव। उलूकपुक्षी। शाला। उलूकपुच्छा। सेना। नक्रोडादिब
हुचः। क्रोडादेर्बहुचश्चस्वांगान्नङीपू। कल्याणक्रोडा। अकृतिगणोयं। सुजघना।
सहनञ्विद्यमानपूर्वाच्च। नञीषू। सकेशा। अकेशा। विद्यमाननासिका। नखमुखात्संज्ञा
यांङीषूना। संपूर्णनखा। गौरमुखा। संज्ञायांकिं। ताम्रमुखीकन्या। वाहः। वाहांतान्ङीषू।
दिग्योहौ। सख्यशिश्वीविभाषायांनिपात्यांते। सखी। अशिश्वी। जातेरस्त्रीविषयाद

योपधात्। जातिवाचियत्नचस्त्रियांनियतमयोपधंततोङीषू। आकृतिग्रहणा
ज्जातिर्लिंगानांचनसर्वभाक्। सकृदाख्यातनिर्ग्राह्यागोत्रंचचरणैः सह। अपसप्रत्ययप्रत्य
यांतःशब्दाश्चवाचिशब्दोजातिकार्यलभतइत्यर्थः। घटी। दृषली। औपगवी। कडी।
जातेःकिंतुंडा। अस्त्रीविषयात्किं। बलाका। अयोपधात्किं। क्षत्रिया। योपधप्रतिषेधेगवय
यमुकयमुनुष्यमत्स्यानामप्रतिषेधः। गवयी। हयी। सुकयी। मनुषी। मत्सी। पाककर्णपर्ण
पुष्पफलमूलबालोत्तरपदाच्च। पाकी। काकुत्तरपदजातिवानःस्त्रीविषयादपिङीषू। ओ
दनपाकी। शंकुपर्णी। शालपर्णी। शंखपुष्पी। दासीफली। दर्भमूली। गोबाली। ओ
षधिविशेषसंज्ञाःइतोमनुष्यजातेःङीषू। अतइत्। दाक्षी। उकारांतात्तद्योपधान्म
नुष्यजातिवाचिनःउदूकुरूः। पंगोश्च। पंगूः। श्वशुरस्याकारोकारलोपश्च। चाद्ङः।
एंयोगलक्षणङाबपवादः। श्वश्रूः। उरूत्तरपदादौपम्ये। उपमानवाचिपूर्वपदंयत्तस्मादू
ङःकारसोरः। संहितशफलक्षणवामादेश्च। संहितोरूः। संहितसहाभ्यांचेति × उरूत्तरपदं ×
तिवक्तव्यं। संहितसखिसहोरूः। हितेनसहसंहितौरुरूयस्याः संहितोरूः। संहेतेरूतिस

होदुरूपस्याः सासहेरूः यद्वाविद्यमानस्यसहशब्दस्युबंतिशयप्रतिपादनायप्रयोगः।सं
२६५ ज्ञायां।कडुकमंडल्वोः संज्ञायांमूङ्।कडूः।कमंडलूः।संज्ञायांकि।कडुः।कमंडलुः।अ
ओछंदोर्थवचनं।शार्ङ्गखाद्यर्थौरीनू।शार्ङ्गंवेदस्ओंकारस्तंदत्तेजातिवाचिनोङीन्स्यात्।शा
र्ङ्गश्चासौदेवी।जातीयनुदत्तेःपुंगोयेऽषिवा।न्यनरयोर्हिश्चेतिगणसूत्रेनारी।यऽश्चापू।
पढंतास्त्रियांचापू।यङ्घयङोःसामान्यकथनंगृह्णा।आंबष्माकारीषगंध्यापाद्यऽश्चापूर्वो
चःपोतिमाष्या।आवद्याच्चाअसमाच्चापू।यऽश्चेतिङीषोपवादः।अवऽशब्दोगर्गादिः।आवद्या।
तद्धिताः।आंपंचमसमाप्तेरधिकारोयंयूनस्तिः।युवनशब्दात्तिःस्यात्सचतद्धितः।तंनं
गविशिष्टपरिभाषयासिद्धेतद्धिताधिकारउत्तरार्थः।युनतिः।अनुपसर्जनादित्येव।ब
ह्वोयुवानोयस्यांबहुयुवा।युवतीतियोतेःशत्रंतानुङ्पूर्वोध्यं॥ ॥इतिस्त्रीप्रत्ययाः।
॥ ॥षष्ठीयुक्तश्छंदसिवा।पतिर्धिसंज्ञः।क्षेत्रस्यपतिनावयं।इहवेतियोगंविभज्यछंदसीयनुव
र्त्तते।तेनसर्वविधयश्छंदसिवेकल्पिकाः।बहुलंछंदसीयादिरत्रैवप्रपंचः।श्रयसुयादीनिछं २६५
दसि।साचूनि।अपदसंज्ञाधिकारात्प्राग्यायोगंसंज्ञाद्वयंबोध्यंतथाचवार्त्तिकं।उभयसंज्ञान्यपीत्ति
वक्तव्यं।समृधुमासऋक्तानागेनापदत्वालुत्वं।मत्वाजभ्यांपावः।नैनंहिंस्येत्पिवाक्षितिषु॥

अत्रपदत्वालुत्वं।मत्वाजभ्यांपवादः।तेप्राग्धातोः।छंदसिपरेपि।व्यवहिताश्चहविर्भ्योयाज्योकथा।आ
मंत्रितंपूर्वमविद्यमानवत्।स्तोयाचहोश्छंदसि।जुहोतेःकर्मणिस्तोयास्यादितीयाच।पवाग्वाग्निहो
त्रंजुहोति।मंत्रेश्वेतवहोक्थशःपुरोडाशोण्विनौ।श्वेतवहादीनांदस्यडसीतिवक्तव्यं।यत्रपदत्वेभावि
तमत्रण्विनौपवादोऽडसूवक्तव्यइतियेर्थः।श्वेतवाः।श्वेतवाहौ।श्वेतवाहः।उक्थानिउक्थैर्वाशंसतिउ
क्थशायजमानः।उक्थशासौ।पुरोदास्यतेदीयतेपुरोडाः।अवयजः।अवयाः।अवयाजौ।अवयाजः।
अवयाःश्वेतवाःपुरोडाश्चाएतेसंबुद्धौनिपात्यंते।लिङर्थेलेट्।सिब्बहुलंलेटि।इतश्चलोपःपरस्मै
पदेषु।लेऽस्तिङांवालेटोडाटौ।वातोपितौ।सिब्बहुलंलिङ्वक्तव्यः।वृद्धिः।प्रणआयूंषितारिषत्।
सुपाःशस्कारतिजोषिषद्धि।आसाविषदृशसानाय।सिपऽपलोपस्यत्वाभावेवे।पनायतोवे
कृत्।प्रियःसूर्येप्रियोअग्नावयाति।सठन्तमस्यलेऽन्तमस्यवालोपः।करवावकरवै
वःदेवेत्वे।आतऐ।ह्वेऽध्याकाम्स्यासुतेभिःसुप्रयसामादयैते।आतामित्याकाम्स्यऐवैतेन्यत्र॥
ह्वेलेऽएवाकाम्स्येस्याद्वाआतेऽइसस्यविषयेवनापश्चनामीशेगृहाग्ध्यानै।अन्यत्रकिं।सुप्रय
सामादयेते।उपसंवादाशंकयोश्च।पणबंधेआशंकायांचलेट्।अहमेवपश्चूनांशी।नोतिलायं
तोनरकंपातयाम।व्यत्ययोबहुलंविकरणानांछंदसि।आंडोश्रुषुस्यमदति।भिनत्तीतिप्रा

ना ऽरसामरतेपतिः। म्रियतइतिप्राप्ते। इडोवस्तेतनेषतु। नयतेर्लोट्। शपूर्विणौ ञ्नौ विकरणौ। ईड्
णयुजातरूषमदत्ते। एमेयथेः। तेतरतेर्विध्यादौलिङ्॥ उः सिप्रशपूर्वेतित्रयोविकरणाः। सिप्नि
ङुपग्रहणलिंगनराणांकालहलस्वरकर्तृयङांच। व्ययथिमसछतिशास्त्रहृदयांसोपि
चसिद्ध्यति बाङुलकेन। धुरिदक्षिणायाः। दक्षिणायामितिप्राप्ते। चषालंये अश्वयूपाय
तक्षतितक्षंतीतिप्राप्ते। उपग्रहःपरस्मैपदमेनपदे। ब्रह्मचारिणमिच्छतेइच्छतीतिप्राप्ते। प्रतीप
मन्युर्मिर्युधतियुध्यतइतिप्राप्ते। मधोस्तृप्साइवासते। मधुनइतिक्षीप्राप्ते। नरःपुरुषः। अधास
वीरैर्दशभिर्वियूयाः। वियूयादितिप्राप्ते। कालःकालवाचकाःप्रत्ययाः। ज्वोग्निनाध्मास्यमाने
ना लुपोविषयेन्दू। तमसोगा अधुक्षत्। अधुक्षदितिप्राप्ते। मित्रवयंचसूरयः। मित्रावयमितिति
प्राप्ते। स्वरव्ययस्तवश्यते। ऊरुकृत्शब्दकारकमात्रपरः। तथाचतद्वाचिनांकृत्तद्धितानां
व्ययत्वं। अन्नादाय। अण्विषये अचू। अवग्रहेविशेषः। यडोयश्चादारभ्यलिङ्गाशिष्यलिङ्कोर्णप्रत्याहारः। तेषांव्ययसंज्ञा। सदतीत्यादिरुक्तएव। छंदस्युभयथा। धात्वधिकारोक्तप्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात्। वर्धतुत्वासुष्टुतयोगिरोमेवर्धयंतीत्यर्थः।

आर्धधातुकस्येडलोपः। विश्वरण्वोः। सार्वधातुकत्वान्नुः। श्रुवःश्रभावश्च। ऊङ्नुवोरितिय
ण्। तुमर्थेसेसेनसेसेन्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङुन्तवै
नः। सेः। एवक्ष्यैयथः। सेन्। तावामध्यै। अमैसे। शरदोजीवसेधाः। असेनित्वाद्युदात्तः। क्रमैसे
कसेन्। गवामिवाश्रियसे। अध्यैअध्यैन्। जठरंएणध्यै। पक्षेआद्युदात्तः। कध्यैकध्यैन्। आङु
वध्यै। शध्यै। उमाराधसःसहमादयध्यैशध्यैन्। वायवेपिबध्यै। तवै। दातवाङुन्तवेङुन्। सुन्तवै।
तवेन्। कर्तवै। प्रयैरोहिष्यै अर्याधिष्यै। एतेनिपात्यंते॥ प्रयातुंरोढुं अव्यथितुमित्यर्थः। दृशे। वि
ख्यैचानिपात्यौ। द्रष्टुं विख्यातुमित्यर्थः। कृत्याश्चार्थेतवैकेन्केन्यत्वनः। धातोरेतेस्युः। तवै॥
अन्चेतवै। केन्। अवगोः। केन्यदिदृक्षेण्यः। त्वन्। कर्त्वं। स्पृतदोः कमुन्। तुमर्थे। पुराक्र
स्यविस्पोविरप्। पुराजत्रुभ्यआदनः। प्रकृत्यांतःपादमव्यपेः। कृपादमध्यस्थएङुप्र
कृत्यास्यात्। नतुवकारयकारपरेअति। उपप्रयंतोध्वरं॥ सुजातेअश्वसूनृते। अं
तःपादंकिंएतासएतेवंति। अव्यपेः। कितवदन्। अव्यादवद्यादवक्रमुरव्रतायमवं
त्वव्यधुःत्व। एषुअव्यपेः। प्रतिएङुप्रकृत्या। वसुभिर्नोअव्यात्। मित्रमहोअवद्यात्।
मासिवामोअवक्रमुः। तेनोअवते। रातधारोअवयंमणिः।

ते नो अवंतु। कुशिकासो अवस्यवः। सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः। ऋजवः संतुपं
१६७ थाः पंथा नइतिप्राप्ते। परमेयो मनु। योमनइतिप्राप्ते। धीती। मती। सुष्टुती। धीया। मया। सु
ष्टुयेतिप्राप्ते पूर्वसवर्णः। यासुरथा। योसुरथावितिप्राप्ते। आनता ब्रह्मणो। नत्त
मितिप्राप्ते। आनू। यादेवविघ्नत्वे। यमिप्राप्ते। आनू। नयुष्मेवा जबंधवः। अस्मेइंद्राबृह
स्पती। युष्मासुमरुत्स्वयमितिप्राप्ते। उरुया। ध्वच्छुया। उरुणा। ध्वच्छुनेतिप्राप्ते। यानाभाए
थिव्याः। नाभावितिप्राप्ते। ज्ञाँता अनुर्ष्वं र्छेत्यावयतात्। अनुष्याव्यवस्थया। आडोड्या।
साधुया। साधीतिप्राप्ते याचू। वसंतायजेता। वसंतेइतिप्राप्ते। आलू। इयाडियाडीकर
णामुपसंख्यानं। उर्विया। ठरूणेतिप्राप्ते। इया। सुक्षेत्रिया। सुक्षेत्रिणेतिप्राप्तेऽयाचू।
दितिंनशुक्लंसरसीशयानं। सख्यामितिप्राप्ते। ईआज्ञसरसुकू। ब्राह्मणासः। तत्रा
दीनांवेयङ्वङौ। तन्वंपुषेम। तनुंपुषेमा। विष्णुंपश्य। विष्णवंपश्य। विष्णंपश्य। स्वर्गोलो
कः। सुवर्गोलोकः॥ त्र्यंबकं। त्रियंबकं। वरेण्यं। वरेणियं। अतोऽभिसएस्। बहुलं १६७
छंदसि। अग्निंदेवेभिः। मंत्रयाड्यादेरात्मनः। आत्मनश्चपूरण्यां। दैर्लोपआडिः।

आत्मनादेवेभिषु। अपोभि। मासः छंदसीतिवक्तव्यं। माड्भिः। श्रड्भिः। प्रसमुपोदः पादपूर
णे। एषोहस्तः। प्रप्रायमग्निः। संसमिद्युवसे। उपोपमेपरामृश। किन्नोऽदुहर्षसे। षष्ठ्याः
पतिपुत्रेष्वपदपयस्पोषेषु। विसर्गस्यसः। वाचस्पतिंविश्वकर्माणं। दिवस्पुत्रायसू
र्यायादिवस्परिं। मदमानः। तमसस्यारमस्या। पृथिव्यातरुस्पृदादिवस्पर्योदिधिषा
णाः। राजयस्योषंयजमानेषुधत्ते॥ ॥इतिवैदिकप्रक्रिया॥ ॥धातोः। अंतउदा
त्तः स्यात्। अनुदात्तंपदमेकवर्जं। परिभाषेयं। स्वरविधिविषया। तस्मिन्नुपदेयस्यो
दात्तः स्वरितोवाविधीयते। तमेकमचंवर्जयित्वा शेषंतत्पदमनुदात्तार्हं स्यात्। गोपा
यतनः। अत्रसनाद्यंताधातवइतिधातुत्वे धातुस्वरेणयकारोकारउदात्तः। शिष्टम
नुदात्तं। उदात्तादनुदात्तस्यस्वरितः। इतितकारोकारः स्वरितः। स्वरितसंहितायां
मनुदात्तानां। एकः श्रुतिः स्यात्। इतिनकारोकारप्रचयः। अनुदात्तस्यचयत्रोदात्त
लोपः। यस्मिन्ननुदात्तेउदात्तेलुप्यते तस्योदात्तः। दिवीवाचे। अत्रजीवुदात्तः। द्यौ

आ

१६८ घ्रदात्तश्च। प्रत्यय आद्युदात्तः॥ कर्त्तव्यः। अनुदात्तौ सुप्पितौ। पूर्वपदस्यापवादः। य
ज्ञस्यनयोयुष्ठति। शसिपोरनुदात्तत्वे स्वरितत्वप्रत्ययौ। चितः। अंतउदात्तःस्यात्। चितः
सप्रकृतेर्बहुव्रीहौ। चितिप्रत्ययेसतिप्रकृतिप्रत्ययस्यांतोदात्तावाचेत्यर्थः। जंपंन
तामन्यकेसमे। यकेसारस्वतीं। मकस्मुकेते। तद्धितस्यापि तोंतउदात्तः। पूर्वपदप्रकृ
तिस्वरबाधनार्थो। कोजायनाः। कितः। तद्धितस्यांतउदात्तः। यदाग्नेयः। तित्स्वरितं।
कनूनंउपोत्तमंरिति। प्रत्ययांतस्योपोत्तमनुदात्तंस्यात्। यदाहवनीयेऽग्न्यादिनि
यं। अदंतस्यनिदंतस्यचादिरुदात्तः। यष्मिन्विश्वाग्निपौंस्या॥ पुंसःकर्मणि। ब्राह्मणा
दित्वात्ष्यञ्। सुतेदधिघ्नश्चनः। चायतेरसुन्। चायेरन्नेङ्स्वश्चेतिचकारात्सु
नोनुडागमः। क्तिति। प्रत्ययास्सर्वमुदात्तंस्यात्। चिकीर्षकः। अत्रईकारस्योदात्त
ता। इत्यादिप्रयोगमनुसृत्यान्याख्यातव्यं॥ ॥इतिस्वरप्रक्रिया॥ ॥ एषावरदरा १६८
जनबालानामुपकारिका॥ अकारिपाणिनीयानांमध्यसिद्धांतकौमुदी॥१॥ य
स्याःसंख्यानुविज्ञेयारचनापाकरक्षिभिः। इतिमध्यकौमुदीसमाप्ता॥ श्रीरस्तु

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मध्यसिद्धांतकौमुदीसमाप्ता॥

२६९

२६९